फेण(न)पः, पुं, स्वयंपतितफलादिजीविमुनिविशेषः। यथा, श्रीभागवते। ३। १२। ४३।
"वैखानसा वालिखिल्यौडुम्बराः फेणपा वने।
न्यासे कुटीचकः पूर्व्वं बह्वोदो हंसनिष्क्रियौ॥"
"वने स्थिताश्चत्वारः। तत्र वैखानसाः अकृष्टपच्यवृत्तयः। वालिखिल्याः नवेऽन्ने लब्धे पूर्व्वसञ्चितान्नत्यागिनः। औडुम्बराः प्रातरुत्थाय यां दिशं प्रथमं पश्यन्ति तत आहृतैः फलादिभिर्जीवन्तः। फेणपाः स्वयं पतितैः फलादिभिर्जीवन्तः। कुटीचकः स्वाश्रमधर्म्मप्रधानः। बह्वोदः कर्म्मोपसर्ज्जनीकृत्य ज्ञानाभ्यासप्रधानः। हंसो ज्ञानाभ्यासनिष्ठः। निष्क्रियः प्राप्ततत्त्वः। एते च सर्व्वे यथोत्तरं श्रेष्ठाः।" इति तट्टीकायां श्रीधरस्वामी॥ (फेनं पिबतीति। फेन+पा+कः। फेनपानकर्त्तरि, त्रि। यथा, महाभारते। १। ६४। २२।
"फेनपांश्च तथा वत्सान् दुहन्ति स्म मानवाः॥")

फेणी(नी), स्त्री, (स्फायते वर्द्धते इति। स्फाय+नक्। गौरादित्वात् ङीष्।) स्वनामख्यातमिष्टान्नविशेषः। यथा, जीर्णमञ्जरी।
"वटी वेशवाराख्यवङ्गेन फेणी-
समं पर्पटः शिग्रुबीजेन याति॥"

फेत्कारिणी, स्त्री, (फेत् करोतीति। कृ+णिनिः। ङीप्।) तन्त्रविशेषः। यथा,—
"उन्मत्तभैरवं नारसिंहं डामरभैरवम्।
शिवाकारं मलिन्याद्यमसिताङ्गादि यामलम्॥
सिद्धयोगेश्वरं तन्त्रं योगिनीजालसम्बरम्।
दृष्ट्वा कृत्वा विधिं फेत्कारिणीतन्त्रं विरच्यते॥"
इति प्रथमश्लोकद्वयम्॥
"फेत्कारिणीतन्त्र इयं मयोक्ता
कृत्या समस्तागमसारभूता।
शत्रोर्विनाशाय धनाय धर्म्म-
मोक्षाय सम्यक् प्रयतो नियोज्या॥"
इति फेत्कारिणीतन्त्रस्य शेषश्लोकः॥

फेत्कारीयः, पुं, तन्त्रविशेषः। तन्त्रसारादिसंग्रहे फेत्कारीये इति शासनं लिखितम्॥

फेनः, पुं, (स्फायते वर्द्धते इति। स्फाय+"फेनमीनौ।" उणा० ३। ३। इति नक् फेशब्दादेशश्च।) फेणः। फेना इति भाषा। तत्पर्य्यायः। डिण्डीरः २ अब्धिकफः ३। इत्यमरः। २। ६। १०५।॥ हिण्डिरः ४। इति शब्दरत्नावली॥ समुद्रकफः ५ जलहासः ६ फेणकः ७। इति त्रिकाण्डशेषः॥ स्फायते फेनः स्फायी ड वृद्धौ नाम्नीति डेनः निपातनात् वलुक् दन्त्यनान्तः। इत्यमरटीकायां भरतः॥ अस्य दन्त्यनान्तस्य प्रमाणान्तरं यथा,
"वाचीरं गगनं फेनस्तनश्च दन्त्यनान्वितम्।
चाटुर्गगनमिच्छन्ति केचिन्मूर्द्धन्ययान्वितम्॥"
इति भरतसेनविरचितं सुखलेखनम्॥
(यथा, रघुः। १३। ११।
"मातङ्गनक्रैः सहसोत्पतद्भि-
र्भिन्नान् द्विधा पश्य समुद्रफेनान्॥"

तरलद्रव्योपरिसमुत्थितबुद्बुदाकारवस्तुमात्रम्। यथा, महाभारते। १। ३। ५२।
"भोः फेनं पिबामि यमिमे वत्सा मातॄणां स्तनान् पिबन्त उद्गिरन्ति॥" ॥ उशद्रथस्य पुत्रः। यथा, हरिवंशे। ३१। २६।
"उशद्रथो महाराज! फेनस्तस्य सुतोऽभवत्॥")

फेनकः, पुं, (फेन+स्वार्थे संज्ञायां वा कन्।) फेनः। इति त्रिकाण्डशेषः॥ पिष्टकविशेषः। अस्य गुणाः। लघुत्वम्। हृद्यत्वम्। शुक्रकारित्वम्। पित्तवायुनाशित्वञ्च। इति राजवल्लभः॥ (यथा च सुश्रुते। १। ४६।
"हृद्याः पथ्यतमास्तेषां लघवः फेनकादयः॥"
गात्रमार्ज्जनादिवत् क्रियाविशेषः। तस्य गुणा यथा, सुश्रुते चिकित्सितस्थाने २४ अध्याये।
"ऊर्व्वोः स्वञ्जनयत्याशु फेनकः स्थैर्य्यलाघवे।
कण्डूकोठानिलस्तम्भमलरोगापहश्च सः॥")

फेनका, स्त्री, (फेनेन कायतीति। कै+कः। टाप्।) जलपक्वतण्डुलचूर्णम्। इति शब्दचन्द्रिका॥

फेनदुग्धा, स्त्री, (फेन इव दुग्धं यस्याः।) दुग्धफेनीक्षुपः। इति राजनिर्घण्टः॥

फेनलः, त्रि, (फेनोऽस्यस्येति। फेन+"फेनादिलच्च।" ५। २। ९९। इति चात् लच्।) फेनवान्। इति सिद्धान्तकौमुदी॥

फेनवान्, [त्] त्रि, (फेनोऽस्यस्येति। "फेनादिलच्च।" ५। २। ९९। इत्यत्र अन्यतरस्यामित्यनुवृत्तेः पक्षे मतुप्। मस्य वः।) फेनिलः। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। ३। १४३। २०।
"तत्र सागरगा ह्यापः कीर्य्यमाणाः समन्ततः।
प्रादुरासन् सुकलुषाः फेनवत्यो विशाम्पते!॥")

फेनवाही, [न्] पुं, (फेनवत् शुभ्रतां वहतीति। वह्+णिनिः।) वस्त्रम्। इति शब्दमाला॥

फेना, स्त्री, (फेनोऽस्ति वाहुल्येनास्याः। फेन+अच्। टाप्।) सातलाक्षुपः। इति राजनिर्घण्टः॥

फेनाग्रं, क्ली, (फेनस्याग्रम्।) बुद्बुदम्। इति हारावली। २०५॥

फेनायमानः, त्रि, (फेनमुद्वमतीति। फेन+"फेनाच्चेति वाच्यम्।" ३। १। १६। इत्यस्य वार्त्तिकोक्त्या क्यङ्। ततः शानच्।) उत्थितफेनदुग्धादिः। फेन इव आचरति यः इत्यर्थे फेनशब्दात् क्यङ्प्रत्ययानन्तरं शानप्रत्ययेन निष्पन्नः॥ (यथा, महाभारते। ६। ३। ३४।
"प्रतिस्रोतोवहा नद्यः सरितः शोणितोदकाः।
फेनायमानाः कूपाश्च नर्द्दन्ति वृषभा इव॥")

फेनाशनिः, पुं, (फेन एवाशनिर्वज्रं यस्य। फेनेन वृत्रासुरनाशनादेवास्य तथात्वम्।) इन्द्रः। इति शब्दमाला॥ (एतद्वृत्तान्तो यथा, देवीभागवते। ६। ६। ५५—५९।
"इति सञ्चिन्त्य मनसा कथं हन्म्यां रिपुं रणे।
अजेयं सर्व्वदा सर्व्वदेवैश्च दानवेश्वरम्॥
यदि वृत्रं न हन्म्यद्य वञ्चयित्वा महाबलम्।
न श्रेयो मम नूनं स्यात् सर्व्वथा रिपुरक्षणात्॥
अपां फेनं तदापश्यत् समुद्रे पर्व्वतोपमम्।
नायं शुष्को न चार्द्रोऽयं न च शस्त्रमिदं तथा॥
अपां फेनं तदा शक्रो जग्राह किल लीलया।
परां शक्तिञ्च सस्मार भक्त्या परमया युतः॥
स्मृतमात्रा तदा देवी स्वांशं फेने न्यधापयत्।
वज्रं तदावृतं तत्र चकार हरिसंयुतम्॥
फेनावृतं पविं तत्र शक्रश्चिक्षेप तं प्रति।
सहसा निपपाताशु वज्राहत इवाचलः॥")

फेनिका, स्त्री, (फेन इवाकृतिरस्त्यस्याः। फेन+ठन्। टाप्।) पक्वान्नविशेषः। खाजा इति भाषा। यथा,—
"समिताया घृताढ्याया वर्त्तीर्दीर्घाः समाचरेत्।
तास्तु सन्निहिता दीर्घाः पीठस्योपरि धारयेत्॥
वेल्लयेद् वेल्लनेनैता यथैका पर्पटी भवेत्।
ततश्छुरिकया तान्तु संलग्नामेव कर्त्तयेत्॥
ततस्तु वेल्लयेद्भूयः सट्टकेन च लेपयेत्।
शालिचूर्णं घृतं तोयं मिश्रितं सट्टकं भवेत्॥
ततः संवृत्य तां लोप्त्रीं विदधीत पृथक् पृथक्।
पुनस्तां वेल्लयेत् लोप्त्रीं यथा स्याच्चक्रलाकृतिः॥
ततस्तां सुपचेदाज्ये भवेयुश्च पुटाः स्फुटाः।
सुगन्धया शर्करया तदुद्धूलनमाचरेत्॥
सिद्धैषा फेनिकानाम्नी मण्डकेन समा गुणैः।
ततः किञ्चिल्लघुरियं विशेषोऽयमुदाहृतः॥"
इति भावप्रकाशः॥

फेनिलं, क्ली, (फेनोऽस्यस्येति। फेन+"फेनादिलच्च।" ५। २। ९९। इति इलच्।) कोलिफलम्। (अस्य पर्य्यायो यथा,—
"पुंसि स्त्रियाञ्च कर्कन्धुर्वदरी कोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं वदरं महत्।
अजप्रिया कुहा कोली विषमो भयकण्टका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) मदनफलम्। सफेने, त्रि। इति मेदिनी॥ (यथा, महाभारते। १। १५३। १०।
"उष्णं नवं प्रपास्यामि फेनिलं रुधिरं बहु॥")

फेनिलः, पुं, (फेन+इलच्।) अरिष्टवृक्षः। इत्यमरः। २। ४। ३१॥ हारिटा इति ख्यातः॥ (अस्य पर्य्यायो यथा,—
"अरिष्टकस्तु माङ्गल्यः कृष्णवर्णोऽर्थसाधनः।
रक्तबीजः पीतफेनः फेनिलो गर्भपातनः॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) वदरवृक्षः। इति राजनिर्घण्टः॥ (स्त्रियां टाप्। जलब्राह्मी। यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये।
"अम्लपिष्टैः सुशीतैश्च फेनिलापल्लवैस्तथा॥")

फेरः, पुं, (फे इति शब्दं राति गृह्णातीति। रा ग्रहणे+कः।) शृगालः। इति शब्दरत्नावली॥

फेरण्डः, पुं, (फे इत्यव्यक्तशब्देन रण्डतीति। रण्ड+अच्।) शृगालः। इति हेमचन्द्रः। ४। ३५५॥